**परमाणु ऊर्जा केंद्रीय विद्यालय - 6**

**पश्चिमी क्षेत्र, अणुशक्तिनगर, मुंबई - 400094**

**कक्षा - 6**

**तृतीय भाषा (संस्कृत)** **दशम: पाठ: कृषिका: कर्मवीरा: अभ्यास प्रश्न**

---

**1.** **<u>उच्चारणं कुरुत</u> -**

| | | |
|---|---|---|
| **सूर्यस्तपतु** | **जीर्णम्** | **शीतकालेऽपि** |
| **वारयितुम्** | **ग्रीष्मे** | **सस्यपूर्णानि** |
| **पद्त्राणे** | **कण्टकावृता** | **क्षुधा-तृषाकुलौ** |

**2.** **<u>श्लोकांशान् योजयत</u>-**

| **क** | **ख** |
|---|---|
| गृहं जीर्णं न वर्षासु | तौ तु क्षेत्राणि कर्षत: \| |
| हलेन च कुदालेन | या शुष्का कण्टकावृता \| |
| पादयोर्न पादत्राणे | सस्यपूर्णानि सर्वदा\| |
| तयो: श्रमेण क्षेत्राणि | शरीरे वसनानि नो\| |
| धरित्री सरसा जाता | वृष्टिं वारयितु क्षमम् \| |

**3.** **<u>उपयुक्तकथनानां समक्षम् 'आम्' अनुपयुक्तकथनानां समक्षं 'न' इति लिखत</u>-**

| | | |
|---|---|---|
| **यथा-** | **कृषका: शीतकालेऽपि कर्मठा: भवन्ति \|** | **आम्** |
| | कृषका: हलेन क्षेत्राणि न कर्षन्ति \| | न |
| (क) | कृषका: सर्वेभ्य: अन्नं यच्छन्ति \| | आम |

| | | |
|---|---|---|
| (ख) | कृषकाणां जीवनं कष्टप्रदं न भवति । | न |
| (ग) | कृषक: क्षेत्राणि सस्यपूर्णानि करोति| | आम् |
| (घ) | शीते शरीरे कम्पनं न भवति । | न |
| (ङ) | श्रमेण धरित्री सरसा भवति । | आम् |

4. **<u>मञ्जूषात:पर्यायवाचिपदानि चित्वा लिखत</u>-**

| **रवि:** | **वस्त्राणि** | **जर्जरम्** | **अधिकम्** | **पृथ्वी** | **पिपासा** |
|---|---|---|---|---|---|

| | |
|---|---|
| वसनानि | **<u>वस्त्राणि</u>** |
| सूर्य: | **<u>रवि:</u>** |
| तृषा | **<u>पिपासा</u>** |
| विपुलम् | **<u>अधिकम्</u>** |
| जीर्णम् | **<u>जर्जरम्</u>** |
| धरित्री | **<u>पृथ्वी</u>** |

5. **<u>मञ्जूषात: विलोमपदानि चित्वा लिखत</u> -**

| **धनिकम्** | **नीरसा** | **अक्षमम्** | **दु:खम्** | **शीते** | **पार्श्वे** |
|---|---|---|---|---|---|

| | |
|---|---|
| सुखम् | **<u>दु:खम्</u>** |
| दूरे | **<u>पार्श्वे</u>** |
| निर्धनम् | **<u>धनिकम्</u>** |
| क्षमम् | **<u>अक्षमम्</u>** |
| ग्रीष्मे | **<u>शीते</u>** |
| सरसा | **<u>नीरसा</u>** |

**6.** **<u>प्रश्नानाम् उत्तराणि लिखत</u> -**

(क) कृषका: केन क्षेत्राणि कर्षन्ति ?

उत्तर - कृषका: हलेन कुदालेन च क्षेत्राणि कर्षन्ति |

(ख) केषां कर्मवीरत्वं न नश्यति ?

उत्तर - कृषकाणां कर्मवीरत्वं न नश्यति |

(ग) श्रमेण का सरसा भवति ?

उत्तर - श्रमेण धरित्री सरसा भवति |

(घ) कृषका: सर्वेभ्य: किं किं यच्छन्ति?

उत्तर - कृषका: सर्वेभ्य: शाकम् , अन्नंम् , दुग्धम् , फलम् च यच्छन्ति |

(ङ) कृषकात् दूरे किं तिष्ठति ?

उत्तर - सुखम् कृषकात् दूरे तिष्ठति